# Shri Dattasahasranamastotram dakArAdi

# શ્રીદત્તસહસ્રનામસ્તોત્રમ્ દકારાદિ

## Document Information

Text title : dakArAdi shrI datta sahasranAma stotram

File name : dakaaradidattasahasra.itx

Category : sahasranAma, deities_misc, dattatreya, stotra, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnanda sarasvatI

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : August 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Shri Dattasahasranamastotram dakArAdi

# શ્રીદત્તસહસ્રનામસ્તોત્રમ્ દકારાદિ

॥ અથ ધ્યાનમ્ ॥

યાવદ્દ્વૈતભ્રમસ્તાવન્ન શાન્તિર્ન પરં સુખમ્ ॥

અતસ્તદર્થં વક્ષ્યેઽદઃ સર્વાત્મત્વાવબોધકમ્ ॥

॥ અથ શ્રી દકારાદિ શ્રી દત્ત સહસ્રનામસ્તોત્રમ્ ॥

ૐ દત્તાત્રેયો દયાપૂર્ણો દત્તો દત્તકધર્મકૃત્ ।
દત્તાભયો દત્તધૈર્યો દત્તારામો દરાર્દનઃ ॥ ૧॥

દવો દવઘ્નો દકદો દકપો દકદાધિપઃ ।
દકવાસી દકધરો દકશાયી દકપ્રિયઃ ॥ ૨॥

દત્તાત્મા દત્તસર્વસ્વો દત્તભદ્રો દયાઘનઃ ।
દર્પકો દર્પકરુચિર્દર્પકાતિશયાકૃતિઃ ॥ ૩॥

દર્પકી દર્પકકલાભિજ્ઞો દર્પકપૂજિતઃ ।
દર્પકોનો દર્પકોક્ષવેગહૃદ્દર્પકાર્દનઃ ॥ ૪॥

દર્પકાક્ષીડ્ દર્પકાક્ષીપૂજિતો દર્પકાધિભૂઃ ।
દર્પકોપરમો દર્પમાલી દર્પકદર્પકઃ ॥ ૫॥

દર્પહા દર્પદો દર્પત્યાગી દર્પાતિગો દમી ।
દર્ભધૃગ્દર્ભકૃદ્દર્ભી દર્ભસ્થો દર્ભપીઠગઃ ॥ ૬॥

દનુપ્રિયો દનુસ્તુત્યો દનુજાત્મજમોહહૃત્ ।
દનુજઘ્નો દનુજજિદ્દનુજશ્રીવિભઞ્જનઃ ॥ ૭॥

દમો દમીડ્ દમકરો દમિવન્દ્યો દમિપ્રિયઃ ।
દમાદિયોગવિદ્રમ્યો દમ્યલીલો દમાત્મકઃ ॥ ૮॥

દમાર્થી દમસમ્પન્નલભ્યો દમનપૂજિતઃ ।

દમદો દમસંભાવ્યો દમમૂલો દમીષ્ટદઃ ॥ ૯॥

દમિતો દમિતાક્ષશ્ચ દમિતેન્દ્રિયવલ્લભઃ ।
દમૂના દમુનાભશ્ચ દમદેવો દમાલયઃ ॥ ૧૦॥

દયાકરો દયામૂલો દયાવશ્યો દયાવ્રતઃ ।
દયાવાન્ દયનીયેશો દયિતો દયિતપ્રિયઃ ॥ ૧૧॥

દયનીયાનસૂયાભૂર્દયનીયાત્રિનંદનઃ ।
દયનીયપ્રિયકરો દયાત્મા ચ દયાનિધિઃ ॥ ૧૨॥

દયાર્દ્રો દયિતાશ્વત્થો દયાશ્લિષ્ટો દયાઘનઃ ।
દયાવિષ્યો દયાભીષ્ટો દયાપ્તો દયનીયદૃક્ ॥ ૧૩॥

દયાવૃતો દયાપૂર્ણો દયાયુક્તાન્તરસ્થિતઃ ।
દયાલુર્દયનીયેક્ષો દયાસિન્ધુર્દયોદયઃ ॥ ૧૪॥

દરદ્રાવિતવાતશ્ચ દરદ્રાવિતભાસ્કરઃ ।
દરદ્રાવિતવહ્નિશ્ચ દરદ્રાવિતવાસવઃ ॥ ૧૫॥

દરદ્રાવિતમૃત્યુશ્ચ દરદ્રાવિતચંદ્રમાઃ ।
દરદ્રાવિતભૂતૌઘો દરદ્રાવિતદૈવતઃ ॥ ૧૬॥

દરાસ્ત્રધૃગ્દરદરો દરાક્ષો દરહેતુકઃ ।
દરદૂરો દરાતીતો દરમૂલો દરપ્રિયઃ ॥ ૧૭॥

દરવાદ્યો દરદવો દરધૃગ્દરવલ્લભઃ ।
દક્ષિણાવર્તદરપો દરોદસ્નાનતત્પરઃ ॥ ૧૮॥

દરપ્રિયો દસ્રવન્દ્યો દસ્રેષ્ટો દસ્રદૈવતઃ ।
દરકણ્ઠો દરાભશ્ચ દરહન્તા દરાનુગઃ ॥ ૧૯॥

દરરાવદ્રાવિતારિર્દરરાવાર્દિતાસુરઃ ।
દરરાવમહામંત્રો દરારાર્પિતભીર્દરીટ્ ॥ ૨૦॥

દરધૃગ્દરવાસી ચ દરશાયી દરાસનઃ ।
દરકૃદ્દરહૃચ્ચાપિ દરગર્ભો દરાતિગઃ ॥ ૨૧॥

દરિદ્રપો દરિદ્રી ચ દરિદ્રજનશેવધિઃ ।
દરીચરો દરીસંસ્થો દરીક્રીડો દરીપ્રિયઃ ॥ ૨૨॥

દરીલભ્યો દરીદેવો દરીકેતનહૃત્સ્થિતિઃ ।
દરાર્તિહૃદ્દલનકૃદ્દલપ્રીતિર્દલોદરઃ ॥ ૨૩ ॥

દલાદર્નષ્યનુગ્રાહી દલાદનસુપૂજિતઃ ।
દલાદગીતમહિમા દલાદલહરીપ્રિયઃ ॥ ૨૪ ॥

દલાશનો દલચતુષ્ટયચક્રગતો દલી ।
દ્વિત્ર્યસ્રપદ્મગતિવિદ્શાસ્રાબ્જવિભેદકઃ ॥ ૨૫ ॥

દ્વિષડ્દલાબ્જભેત્તા ચ દ્વ્યષ્ટાસ્રાબ્જવિભેદકઃ ।
દ્વિદલસ્થો દશશતપત્રપદ્મગતિપ્રદઃ ॥ ૨૬ ॥

દ્વ્યક્ષરાવૃત્તિકૃદ્-દ્વ્યક્ષો દશાસ્યવરદર્પહા ।
દવપ્રિયો દવચરો દવશાયી દવાલયઃ ॥ ૨૭ ॥

દવીયાન્દવક્ત્રશ્ચ દવિષ્ઠાયનપારકૃત્ ।
દવમાલી દવદવો દવદોષનિશાતનઃ ॥ ૨૮ ॥

દવસાક્ષી દવત્રાણો દવારામો દવસ્થગઃ ।
દશહેતુર્દશાતીતો દશાધારો દશાકૃતિઃ ॥ ૨૯ ॥

દશષડ્બંધસંવિદ્ધો દશષડ્બંધભેદનઃ ।
દશાપ્રદો દશાભિજ્ઞો દશાસાક્ષી દશાહરઃ ॥ ૩૦ ॥

દશાયુધો દશમહાવિદ્યાર્ચ્યો દશપઞ્ચદૃક્ ।
દશલક્ષણલક્ષ્યાત્મા દશષડ્વાક્યલક્ષિતઃ ॥ ૩૧ ॥

દર્દુરવ્રાતવિહિતધ્વનિજ્ઞાપિતવૃષ્ટિકઃ ।
દશપાલો દશબલો દશેન્દ્રિય વિહારકૃત્ ॥ ૩૨ ॥

દશેન્દ્રિય ગણાધ્યક્ષો દશેન્દ્રિયદૃગૂર્ધ્વગઃ ।
દશૈકગુણગમ્યશ્ચ દશેન્દ્રિયમલાપહા ॥ ૩૩ ॥

દશેન્દ્રિયપ્રેરકશ્ચ દશેન્દ્રિયનિબોધનઃ ।
દશૈકમાનમેયશ્ચ દશૈકગુણચાલકઃ ॥ ૩૪ ॥

દશભૂર્દર્શનાભિજ્ઞો દર્શનાદર્શિતાત્મકઃ ।
દશાશ્વમેધતીર્થેષ્ટો દશાસ્યરથચાલકઃ ॥ ૩૫ ॥

દશાસ્યગર્વહર્તા ચ દશાસ્યપુરભઞ્જનઃ ।
દશાસ્યકુલવિધ્વંસી દશાસ્યાનુજપૂજિતઃ ॥ ૩૬ ॥

દર્શનપ્રીતિદો દર્શયજનો દર્શનાદુરઃ ।
દર્શનીયો દશબલપક્ષભિચ્ચ દશાર્તિહા ॥ ૩૭॥

દશાર્તિગો દશાશાપો દશગ્રન્થવિશારદઃ ।
દશપ્રાણવિહારી ચ દશપ્રાણગતિર્દૃશિઃ ॥ ૩૮॥

દશાઙ્ગુલાધિકાત્મા ચ દાશાર્હો દશષટ્સુભુક્ ।
દશપ્રાગાદ્યઙ્ગુલીકકરનમ્રદ્વિડન્તકઃ ॥ ૩૯॥

દશબ્રાહ્મણભેદજ્ઞો દશબ્રાહ્મણભેદકૃત્ ।
દશબ્રાહ્મણસમ્પૂજ્યો દશનાર્તિનિવારણઃ ॥ ૪૦॥

દોષજ્ઞો દોષદો દોષાધિપબંધુર્દ્વિષદ્ધરઃ ।
દોષૈકદૃક્પક્ષઘાતી દષ્ટસર્પાર્તિશામકઃ ॥ ૪૧॥

દધિક્રાશ્વ દધિક્રાવગામી દધ્યઙ્મુનીષ્ટદઃ ।
દધિપ્રિયો દધિસ્નાતો દધિપો દધિસિન્ધુગઃ ॥ ૪૨॥

દધિભો દધિલિપ્તાઙ્ગો દધ્યક્ષતવિભૂષણઃ ।
દધિદ્રપ્સપ્રિયો દભ્રવેદ્યવિજ્ઞાતવિગ્રહઃ ॥ ૪૩॥

દહનો દહનાધારો દહરો દહરાલયઃ ।
દહ્રદૃગ્દહરાકાશો દહરાછાદનાન્તકઃ ॥ ૪૪॥

દગ્ધભ્રમો દગ્ધકામો દગ્ધાર્તિર્દગ્ધમત્સરઃ ।
દગ્ધભેદો દગ્ધમદો દગ્ધાધિર્દગ્ધવાસનઃ ॥ ૪૫॥

દગ્ધારિષ્ટો દગ્ધકષ્ટો દગ્ધાર્તિર્દગ્ધદુષ્ક્રિયઃ ।
દગ્ધાસુરપુરો દગ્ધભુવનો દગ્ધસત્ક્રિયઃ ॥ ૪૬॥

દક્ષો દક્ષાધ્વરધ્વંસી દક્ષપો દક્ષપૂજિતઃ ।
દાક્ષિણાત્યાર્ચિતપદો દાક્ષિણાત્યસુભાવગઃ ॥ ૪૭॥

દક્ષિણાશો દક્ષિણેશો દક્ષિણાસાદિતાધ્વરઃ ।
દક્ષિણાર્પિતસલ્લોકો દક્ષવામાદિવર્જિતઃ ॥ ૪૮॥

દક્ષિણોત્તરમાર્ગજ્ઞો દક્ષિણ્યો દક્ષિણાર્હકઃ ।
દ્રુમાશ્રયો દ્રુમાવાસો દ્રુમશાયી દ્રુમપ્રિયઃ ॥ ૪૯॥

દ્રુમજન્મપ્રદો દ્રુસ્થો દ્રુરૂપભવશાતનઃ ।

દ્રુમત્વગમ્બરો દ્રોણો દ્રોણીસ્થો દ્રોણપૂજિતઃ ॥ ૫૦॥

દ્રુઘણી દ્રુઘણાસ્ત્રશ્ચ દ્રુશિષ્યો દ્રુધર્મધૃક્ ।
દ્રવિણાર્થો દ્રવિણદો દ્રાવણો દ્રાવિડપ્રિયઃ ॥ ૫૧॥

દ્રાવિતપ્રણતાઘો દ્રાક્ફલો દ્રાક્કેન્દ્રમાર્ગવિત્ ।
દ્રાઘીય આયુર્દધાનો દ્રાઘીયાન્દ્રાક્પ્રસાદકૃત્ ॥ ૫૨॥

દ્રુતતોષો દ્રુતગતિવ્યતીતો દ્રુતભોજનઃ ।
દ્રુફલાશી દ્રુદલભુગ્દૃષદ્ધત્યાપ્લવાદરઃ ॥ ૫૩॥

દ્રુપદેડ્યો દ્રુતમતિર્દ્રુતીકરણકોવિદઃ ।
દ્રુતપ્રમોદો દ્રુતિધૃગ્દ્રુતિક્રીડાવિચક્ષણઃ ॥ ૫૪॥

દૃઢો દૃઢાકૃતિર્દાર્ઢ્યા દૃઢસત્ત્વો દૃઢવ્રતઃ ।
દૃઢચ્યુતો દૃઢબલો દૃઢાર્થાસક્તિવારણઃ ॥ ૫૫॥

દૃઢધીર્દૃઢભક્તિદૃગ્દૃઢભક્તિવરપ્રદઃ ।
દૃઢદૃગ્દૃઢભક્તિજ્ઞો દૃઢભક્તો દૃઢાશ્રયઃ ॥ ૫૬॥

દૃઢદણ્ડો દૃઢયમો દૃઢપ્રદો દૃઢાઙ્ગકૃત્ ।
દૃઢકાયો દૃઢધ્યાનો દૃઢાભ્યાસો દૃઢાસનઃ ॥ ૫૭॥

દૃગ્દો દૃગ્દોષહરણો દૃષ્ટિ દ્વંદ્વ વિરાજિતઃ ।
દૃક્પૂર્વો દૃઙ્ગમનોતીતો દૃક્પૂતગમનો દૃગીટ્ ॥ ૫૮॥

દૃગિષ્ટો દૃષ્ટ્યવિષમો દૃષ્ટિહેતુર્દૃષ્ટત્તનુઃ ।
દૃગ્લભ્યો દૃક્ત્રયયુતો દૃગ્બાહુલ્યવિરાજિતઃ ॥ ૫૯॥

દ્યુપતિર્દ્યુપદૃગ્દ્યુસ્થો દ્યુમણિર્દ્યુપ્રવર્તકઃ ।
દ્યુદેહો દ્યુગમો દ્યુસ્થો દ્યુભૂર્દ્યુર્દ્યુલયો દ્યુમાન્ ॥ ૬૦॥

દ્યુનિઙ્ગતિદ્યુતિદ્યૂનસ્થાનદોષહરો દ્યુભુક્ ।
દ્યૂતકૃદ્દ્યૂતહૃદ્દ્યૂતદોષહૃદ્દ્યૂતદૂરગઃ ॥ ૬૧॥

દૃપ્તો દૃપ્તાર્દનો દ્યોસ્થો દ્યોપાલો દ્યોનિવાસકૃત્ ।
દ્રાવિતારિર્દ્રાવિતાલ્પમૃત્યુર્દ્રાવિતકૈતવઃ ॥ ૬૨॥

દ્યાવાભૂમિસંધિદર્શી દ્યાવાભૂમિધરો દ્યુદૃક્ ।
દ્યોકૃદ્દ્યોતહૃદ્દ્યોતી દ્યોતાક્ષો દ્યોતદીપનઃ ॥ ૬૩॥

ઘોતમૂલો ઘોતિતાત્મા ઘોતોઘૌર્ઘોતિતાખિલઃ ।
દ્વયવાદિમતદ્વેષી દ્વયવાદિમતાન્તકઃ ॥ ૬૪॥

દ્વયવાદિવિજયી દીક્ષાદ્વયવાદિનિકૃન્તનઃ ।
દ્વ્યષ્ટવર્ષવયા દ્વ્યષ્ટનૃપવંદ્યો દ્વિષટ્ક્રિયઃ ॥ ૬૫॥

દ્વિષત્કલાનિધિર્દ્વીપિચર્મધૃગ્દ્વ્યષ્ટજાતિકૃત્ ।
દ્વ્યષ્ટોપચારદયિતો દ્વ્યષ્ટસ્વરતનુર્દ્વિભિત્ ॥ ૬૬॥

દ્વ્યક્ષરાખ્યો દ્વ્યષ્ટકોટિસ્વજપીષ્ટાર્થપૂરકઃ ।
દ્વિપાદ્વ્યાત્મા દ્વિગુર્દ્વીશો દ્વ્યતીતો દ્વિપ્રકાશકઃ ॥ ૬૭॥

દ્વૈતીભૂતાત્મકો દ્વૈધીભૂતચિદ્વૈધશામકઃ ।
દ્વિસપ્તભુવનાધારો દ્વિસપ્તભુવનેશ્વરઃ ॥ ૬૮॥

દ્વિસપ્તભુવનાન્તસ્થો દ્વિસપ્તભુવનાત્મકઃ ।
દ્વિસપ્તલોકકર્તા દ્વિસપ્તલોકાધિપો દ્વિપઃ ॥ ૬૯॥

દ્વિસપ્તવિદ્યાભિજ્ઞો દ્વિસપ્તવિદ્યાપ્રકાશકઃ ।
દ્વિસપ્તવિદ્યાવિભવો દ્વિસપ્તેન્દ્રપદપ્રદઃ ॥ ૭૦॥

દ્વિસપ્તમનુમાન્યશ્ચ દ્વિસપ્તમનુપૂજિતઃ ।
દ્વિસપ્તમનુદેવો દ્વિસપ્તમન્વન્તરર્ધિકૃત્ ॥ ૭૧॥

દ્વિચત્વારિંશદ્બુદ્ધર્તા દ્વિચત્વારિકલાસ્તુતઃ ।
દ્વિસ્તનીગોરસાસ્પૃગ્દ્વિહાયનીપાલકો દ્વિભુક્ ॥ ૭૨॥

દ્વિસૃષ્ટિર્દ્વિવિધો દ્વીડ્યો દ્વિપથો દ્વિજધર્મકૃત્ ।
દ્વિજો દ્વિજાતિમાન્યશ્ચ દ્વિજદેવો દ્વિજાતિકૃત્ ॥ ૭૩॥

દ્વિજપ્રેષ્ઠો દ્વિજશ્રેષ્ઠો દ્વિજરાજસુભૂષણઃ ।
દ્વિજરાજાગ્રજો દ્વિડ્દ્વીડ્ દ્વિજાનનસુભોજનઃ ॥ ૭૪॥

દ્વિજાસ્યો દ્વિજભક્તો દ્વિજાતિભૃદ્વિજસત્કૃતઃ ।
દ્વિવિધો દ્વ્યાવૃતિર્દ્વંદ્વવારણો દ્વિમુખાદનઃ ॥ ૭૫॥

દ્વિજપાલો દ્વિજગુરુર્દ્વિજરાજાસનો દ્વિપાત્ ।
દ્વિજિહ્વસૂત્રો દ્વિજિહ્વફણછત્રો દ્વિજિહ્વભત્ ॥ ૭૬॥

દ્વાદશાત્મા દ્વાપરદૃગ્ દ્વાદશાદિત્યરૂપકઃ ।
દ્વાદશીશો દ્વાદશારચક્રધૃગ્ દ્વાદશાક્ષરઃ ॥ ૭૭॥

દ્વાદશીપારણો દ્વાર્દશ્યચ્યો દ્વાદશ ષડ્બલઃ ।
દ્વાસપ્તતિ સહસ્રાઙ્ગ નાડીગતિ વિચક્ષણઃ ॥ ૭૮॥

દ્વંદ્વદો દ્વંદ્વદો દ્વંદ્વબીભત્સો દ્વંદ્વતાપનઃ ।
દ્વંદ્વાર્તિહૃદ્ દ્વંદ્વસહો દ્વયા દ્વંદ્વાતિગો દ્વિગઃ ॥ ૭૯॥

દ્વારદો દ્વારવિદ્વાસ્થો દ્વારધૃગ્ દ્વારિકાપ્રિયઃ ।
દ્વારકૃદ્ દ્વારગો દ્વારનિર્ગમ ક્રમ મુક્તિગઃ ॥ ૮૦॥

દ્વારભૃદ્ દ્વારનવકગતિસંસૃતિદર્શકઃ ।
દ્વૈમાતુરો દ્વૈતહીનો દ્વૈતારણ્યવિનોદનઃ ॥ ૮૧॥

દ્વૈતાસ્પૃગ્ દ્વૈતગો દ્વૈતાદ્વૈતમાર્ગવિશારદઃ ।
દાતા દાતૃપ્રિયો દાવો દારુણો દારદાશનઃ ॥ ૮૨॥

દાનદો દારુવસતિર્દાસ્યજ્ઞો દાસસેવિતઃ ।
દાનપ્રિયો દાનતોષો દાનજ્ઞો દાનવિગ્રહઃ ॥ ૮૩॥

દાસ્યપ્રિયો દાસપાલો દાસ્યદો દાસતોષણઃ ।
દાવોષ્ણહૃદ્ દાન્તસેવ્યો દાન્તજ્ઞો દાન્ત વલ્લભઃ ॥ ૮૪॥

દાતદોષો દાતકેશો દાવચારી ચ દાવપઃ ।
દાયકૃદ્દાયભુગ્ દારસ્વીકારવિધિદર્શકઃ ॥ ૮૫॥

દારમાન્યો દારહીનો દારમેધિસુપૂજિતઃ ।
દાનવાન્ દાનવારાતિર્દાનવાભિજનાન્તકઃ ॥ ૮૬॥

દામોદરો દામકરો દારસ્નેહોતચેતનઃ ।
દાર્વીલિપો દારમોહો દારિકાકૌતુકાન્વિતઃ ॥ ૮૭॥

દારિકાદોદ્ધારકશ્ચ દાતદારુકસારથિઃ ।
દાહકૃદ્દાહશાન્તિજ્ઞો દાક્ષાયણ્યધિદૈવતઃ ॥ ૮૮॥

દ્રાંબીજો દ્રાંમનુર્દાન્તશાન્તોપરતવીક્ષિતઃ ।
દિવ્યકૃદ્દિવ્યવિદ્દિવ્યો દિવિસ્પૃગ્ દિવિજાર્થદઃ ॥ ૮૯॥

દિક્પો દિક્પતિપો દિગ્વિદ્દિગન્તરલુઠદ્યશઃ ।
દિગ્દર્શનકરો દિષ્ટો દિષ્ટાત્મા દિષ્ટભાવનઃ ॥ ૯૦॥

દૃષ્ટો દૃષ્ટાન્તદો દૃષ્ટાતિગો દૃષ્ટાન્તવર્જિતઃ ।

દિષ્ટં દિષ્ટપરિચ્છેદહીનો દિષ્ટનિયામકઃ ॥ ૯૧॥

દિષ્ટાસ્પૃષ્ટગતિર્દિષ્ટેડ્દિષ્ટકૃદ્દિષ્ટચાલકઃ ।
દિષ્ટદાતા દિષ્ટહન્તા દુર્દિષ્ટફલશામકઃ ॥ ૯૨॥

દિષ્ટવ્યામજગદ્દિષ્ટશંસકો દિષ્ટયત્નવાન્ ।
દિતિપ્રિયો દિતિસ્તુત્યો દિતિપૂજ્યો દિતીષ્ટદઃ ॥ ૯૩॥

દિતિપાખણ્ડદાવો દિગ્દિનચર્યાપરાયણઃ ।
દિગમ્બરો દિવ્યકાંતિર્દિવ્યગંધોઽપિ દિવ્યભુક્ ॥ ૯૪॥

દિવ્યભાવો દીદિવિકૃદ્દોષહૃદ્દીપ્તલોચનઃ ।
દીર્ઘજીવી દીર્ઘદૃષ્ટિર્દીર્ઘાઙ્ગો દીર્ઘબાહુકઃ ॥ ૯૫॥

દીર્ઘશ્રવા દીર્ઘગતિર્દીર્ઘવક્ષાશ્ચ દીર્ઘપાત્ ।
દીનસેવ્યો દીનબન્ધુર્દીનપો દીપિતાન્તરઃ ॥ ૯૬॥

દીનોદ્ધર્તા દીપ્તકાન્તિર્દીપ્રક્ષુરસમાયનઃ ।
દીવ્યન્ દીક્ષિતસમ્પૂજ્યો દીક્ષાદો દીક્ષિતોત્તમઃ ॥ ૯૭॥

દીક્ષણીયેષ્ટિકૃદ્દીક્ષાદીક્ષાદ્વયવિચક્ષણઃ ।
દીક્ષાશી દીક્ષિતાન્નાશી દીક્ષાકૃદ્દીક્ષિતાદરઃ ॥ ૯૮॥

દીક્ષિતાર્થ્યો દીક્ષિતાશો દીક્ષિતાભીષ્ટપૂરકઃ ।
દીક્ષાપટુર્દીક્ષિતાત્મા દીઘદ્દીક્ષિતગર્વહૃત્ ॥ ૯૯॥

દુષ્કર્મહા દુષ્કૃતઘ્નો દુષ્કૃદ્દુષ્કૃતિપાવનઃ ।
દુષ્કૃત્સાક્ષી દુષ્કૃતહૃત્ દુષ્કૃદ્ધ્વા દુષ્કૃદાર્તિદઃ ॥ ૧૦૦॥

દુષ્ક્રિયાન્તો દુષ્કરકૃદ્ દુષ્ક્રિયાઘનિવારકઃ ।
દુષ્કુલત્યાજકો દુષ્કૃત્પાવનો દુષ્કુલાન્તકઃ ॥ ૧૦૧॥

દુષ્કુલાઘહરો દુષ્કૃદ્ગતિદો દુષ્કરક્રિયઃ ।
દુષ્કલઙ્કુવિનાશી દુષ્કોપો દુષ્કણ્ટકાર્દનઃ ॥ ૧૦૨॥

દુષ્કારી દુષ્કરતપા દુઃખદો દુઃખહેતુકઃ ।
દુઃખત્રયહરો દુઃખત્રયદો દુઃખદુઃખદઃ ॥ ૧૦૩॥

દુઃખત્રયાર્તિવિદ્ દુઃખિપૂજિતો દુઃખશામકઃ ।
દુઃખહીનો દુઃખહીનભક્તો દુઃખવિશોધનઃ ॥ ૧૦૪॥

દુઃખફૃદ્ દુઃખદમનો દુઃખિતારિશ્ચ દુઃખનુત્ ।
દુઃખાતિગો દુઃખલહા દુઃખેટાર્તિનિવારણઃ ॥ ૧૦૫॥

દુઃખેટદૃષ્ટિદોષઘ્નો દુઃખગારિષ્ટનાશકઃ ।
દુઃખેચરદશાર્તિઘ્નો દુષ્ટખેટાનુકૂલ્યકૃત્ ॥ ૧૦૬॥

દુઃખોદર્કાચ્છાદકો દુઃખોદર્કગતિસૂચકઃ ।
દુઃખોદર્કાર્થસન્ત્યાગી દુઃખોદર્કાર્થદોષદૃક્ ॥ ૧૦૭॥

દુર્ગા દુર્ગાર્તિહૃદ્ દુર્ગી દુર્ગેશો દુર્ગસંસ્થિતઃ ।
દુર્ગમો દુર્ગમગતિર્દુર્ગારામશ્ચ દુર્ગભૂઃ ॥ ૧૦૮॥

દુર્ગાનવકસમ્પૂજ્યો દુર્ગાનવકસંસ્તુતઃ ।
દુર્ગભિદ્ દુર્ગતિર્દુર્ગમાર્ગગો દુર્ગમાર્થદઃ ॥ ૧૦૯॥

દુર્ગતિઘ્નો દુર્ગતિદો દુર્ગ્રહો દુર્ગ્રહાર્તિહૃત્ ।
દુર્ગ્રહાવેશહૃદ્ દુષ્ટગ્રહનિગ્રહકારકઃ ॥ ૧૧૦॥

દુર્ગ્રહોચ્ચાટકો દુષ્ટગ્રહજિદ્ દુર્ગમાદરઃ ।
દુર્દૃષ્ટિબાધાશમનો દુર્દૃષ્ટિભયહાપકઃ ॥ ૧૧૧॥

દુર્ગુણો દુર્ગુણાતીતો દુર્ગુણાતીતવલ્લભઃ ।
દુર્ગન્ધનાશો દુર્ઘાતો દુર્ઘટો દુર્ઘટક્રિયઃ ॥ ૧૧૨॥

દુશ્ચર્યો દુશ્ચરિત્રારિર્દુશ્ચિકિત્સ્યગદાન્તકઃ ।
દુશ્ચિત્તાહ્લાદકો દુશ્ચિચ્છાસ્તા દુશ્ચેષ્ટશિક્ષકઃ ॥ ૧૧૩॥

દુશ્ચિન્તાશમનો દુશ્ચિદ્દુશ્છન્દવિનિવર્તકઃ ।
દુર્જયો દુર્જરો દુર્જિજ્જયી દુર્જેયચિત્તજિત્ ॥ ૧૧૪॥

દુર્જાપ્યહર્તા દુર્વાર્તાશાન્તિર્દુર્જાતિદોષહૃત્ ।
દુર્જનારિર્દુશ્ચવનો દુર્જનપ્રાન્તહાપકઃ ॥ ૧૧૫॥

દુર્જનાર્તો દુર્જનાર્તિહરો દુર્જલદોષહૃત્ ।
દુર્જીવહા દુષ્ટહન્તા દુષ્ટાર્તપરિપાલકઃ ॥ ૧૧૬॥

દુષ્ટવિદ્રાવણો દુષ્ટમાર્ગભિદ્ દુષ્ટસંગહૃત્ ।
દુર્જીવહત્યાસંતોષો દુર્જનાનનકીલનઃ ॥ ૧૧૭॥

દુર્જીવવૈરહૃદ્ દુષ્ટોચ્ચાટકો દુસ્તરોદ્ધરઃ ।
દુષ્ટદણ્ડો દુષ્ટખણ્ડો દુષ્ટધ્રુગ્ દુષ્ટમુંડનઃ ॥ ૧૧૮॥

દુષ્ટભાવોપશમનો દુષ્ટવિદ્ દુષ્ટશોધનઃ ।
દુસ્તર્કહૃદ્ દુસ્તર્કારિર્દુસ્તાપપરિશાન્તિકૃત્ ॥ ૧૧૯॥

દુર્દૈવહૃદ્ દુન્દુભિઘ્નો દુન્દુભ્યાઘાતહર્ષકૃત્ ।
દુર્ધીહરો દુર્નયહૃદ્દુઃપક્ષિધ્વનિદોષહૃત્ ॥ ૧૨૦॥

દુષ્પ્રયોગોપશમનો દુષ્પ્રતિગ્રહદોષહૃત્ ।
દુર્બલાપ્નો દુર્બોધાત્મા દુર્બન્ધચ્છિદ્દુરત્યયઃ ॥ ૧૨૧॥

દુર્બાધાહૃદ્ દુર્ભયહૃદ્ દુર્ભ્રમોપશમાત્મકઃ ।
દુર્ભિક્ષહૃદ્દુર્યશોહૃદ્ દુરુત્પાતોપશામકઃ ॥ ૧૨૨॥

દુર્મન્ત્રયન્ત્રતન્ત્રચ્છિદ્ દુર્મિત્રપરિતાપનઃ ।
દુર્યોગહૃદ્ દુરાધર્પો દુરારાધ્યો દુરાસદઃ ॥ ૧૨૩॥

દુરત્યયસ્વમાયાબ્ધિ તારકો દુરવગ્રહઃ ।
દુર્લભો દુર્લભતમો દુરાલાપાઘશામકઃ ॥ ૧૨૪॥

દુર્નામહૃદ્ દુરાચારપાવનો દુરપોહનઃ ।
દુરાશ્રમાઘહૃદ્દુર્ગપથલભ્યચિદાત્મકઃ ॥ ૧૨૫॥

દુરધ્વપારદો દુર્ભુક્પાવનો દુરિતાર્તિહા ।
દુરાશ્લેષાઘહર્તા દુર્મૈથુનૈનોનિબર્હણઃ ॥ ૧૨૬॥

દુરામયાન્તો દુર્વૈરહર્તા દુર્વ્યસનાન્તકૃત્ ।
દુઃસહો દુઃશકુનહૃદ્ દુઃશીલપરિવર્તનઃ ॥ ૧૨૭॥

દુઃશોકહૃદ્ દુઃશઙ્કાહૃદ્દુઃસઙ્ગભયવારણઃ ।
દુઃસહાભો દુઃસહદૃગ્દુઃસ્વપ્નભયનાશનઃ ॥ ૧૨૮॥

દુઃસંગદોષસઞ્જાતદુર્મનીષાવિશોધનઃ ।
દુઃસઙ્ગિપાપદહનો દુઃક્ષણાઘનિવર્તનઃ ॥ ૧૨૯॥

દુઃક્ષેત્રપાવનો દુઃક્ષુદ્ ભયહૃદ્દુઃક્ષયાર્તિહૃત્ ।
દુઃક્ષત્રહૃચ્ચ દુર્જ્ઞેયો દુર્જ્ઞાનપરિશોધનઃ ॥ ૧૩૦॥

દૂતો દૂતેરકો દૂતપ્રિયો દૂરશ્ચ દૂરદૃક્ ।
દૂનચિત્તાહ્લાદકશ્ચ દૂર્વાભો દૂષ્યપાવનઃ ॥ ૧૩૧॥

દેદીપ્યમાનનયનો દેવો દેદીપ્યમાનભઃ ।

દેદીપ્યમાનરદનો દેશ્યો દેદીપ્યમાનધીઃ ॥ ૧૩૨॥

દેવેષ્ટો દેવગો દેવી દેવતા દેવતાર્ચિતઃ ।
દેવમાતૃપ્રિયો દેવપાલકો દેવવર્ધકઃ ॥ ૧૩૩॥

દેવમાન્યો દેવવન્દ્યો દેવલોકપ્રિયંવદઃ ।
દેવારિષ્ટહરો દેવાભીષ્ટદો દેવતાત્મકઃ ॥ ૧૩૪॥

દેવભક્તપ્રિયો દેવહોતા દેવકુલાદૃતઃ ।
દેવતન્તુર્દેવસમ્પદ્દેવદ્રોહિસુશિક્ષકઃ ॥ ૧૩૫॥

દેવાત્મકો દેવમયો દેવપૂર્વશ્ચ દેવભૂઃ ।
દેવમાર્ગપ્રદો દેવશિક્ષકો દેવગર્વહૃત્ ॥ ૧૩૬॥

દેવમાર્ગાન્તરાયઘ્નો દેવયજ્ઞાદિધર્મધૃક્ ।
દેવપક્ષી દેવસાક્ષી દેવદેવેશભાસ્કરઃ ॥ ૧૩૭॥

દેવારાતિહરો દેવદૂતો દૈવતદૈવતઃ ।
દેવભીતિહરો દેવગેયો દેવહવિર્ભુજઃ ॥ ૧૩૮॥

દેવશ્રાવ્યો દેવદૃશ્યો દેવર્ણી દેવભોગ્યભુક્ ।
દેવીશો દેવ્યભીષ્ટાર્થો દેવીડ્યો દેવ્યભીષ્ટકૃત્ ॥ ૧૩૯॥

દેવીપ્રિયો દેવકીજો દેશિકો દેશિકાર્ચિતઃ ।
દેશિકેડ્યો દેશિકાત્મા દેવમાતૃકદેશપઃ ॥ ૧૪૦॥

દેહકૃદ્દેહધૃગ્દેહી દેહગો દેહભાવનઃ ।
દેહપો દેહદો દેહચતુષ્ટયવિહારકૃત્ ॥ ૧૪૧॥

દેહીતિપ્રાર્થનીયશ્ચ દેહબીજનિકૃન્તનઃ ।
દેવનાસ્પૃગ્દેવનકૃદ્દેહાસ્પૃગ્દેહભાવનઃ ॥ ૧૪૨॥

દેવદત્તો દેવદેવો દેહાતીતોઽપિ દેહભૃત્ ।
દેહદેવાલયો દેહાસઙ્ગો દેહરથેષ્ટગઃ ॥ ૧૪૩॥

દેહધર્મા દેહકર્મા દેહસંબન્ધપાલકઃ ।
દેયાત્મા દેયવિદ્દેશાપરિચ્છિન્નશ્ચ દેશકૃત્ ॥ ૧૪૪॥

દેશપો દેશવાન્ દેશી દેશજ્ઞો દેશિકાગમઃ ।
દેશભાષાપરિજ્ઞાની દેશભૂર્દેશપાવનઃ ॥ ૧૪૫॥

દેશ્યપૂજ્યો દેવકૃતોપસર્ગનિવર્તકઃ ।
દિવિષદ્વિહિતાવર્ષાતિવૃષ્ટ્યાદીતિશામકઃ ॥ ૧૪૬॥

દૈવીગાયત્રિકાજાપી દૈવસમ્પત્તિપાલકઃ ।
દૈવીસમ્પત્તિસમ્પન્નમુક્તિકૃદ્દૈવભાવગઃ ॥ ૧૪૭॥

દૈવસમ્પત્ત્યસમ્પન્નછાયાસ્પૃગ્દૈત્યભાવહૃત્ ।
દૈવદો દૈવફલદો દૈવાદિત્રિક્રિયેશ્વરઃ ॥ ૧૪૮॥

દૈવાનુમોદનો દૈન્યહરો દૈવજ્ઞદેવતઃ ।
દૈવજ્ઞો દૈવવિત્પૂજ્યો દૈવિકો દૈન્યકારણઃ ॥ ૧૪૯॥

દૈન્યાઞ્જનહૃતસ્તંભો દોષત્રયશમપ્રદઃ ।
દોષહર્તા દૈવભિષગ્દોષદો દોર્દ્વયાન્વિતઃ ॥ ૧૫૦॥

દોષજ્ઞો દોહદાશંસી દોગ્ધા દોષ્યન્તિતોષિતઃ ।
દૌરાત્મ્યદૂરો દૌરાત્મ્યહૃદ્દૌરાત્મ્યાર્તિશાન્તિકૃત્ ॥ ૧૫૧॥

દૌરાત્મ્યદોષસંહર્તા દૌરાત્મ્યપરિશોધનઃ ।
દૌર્મનસ્યહરો દૌત્યકૃદ્દૌત્યોપાસ્તશક્તિકઃ ॥ ૧૫૨॥

દૌર્ભાગ્યદોઽપિ દૌર્ભાગ્યહૃદ્દૌર્ભાગ્યાર્તિશાન્તિકૃત્ ।
દૌષ્ટ્યઘ્નો દૌષ્કુલ્યદોષહૃદ્દૌષ્કુલ્યાધિશામકઃ ॥ ૧૫૩॥

દંદશૂકપરિષ્કારો દંદશૂકકૃતાયુધઃ ।
દન્તિચર્મપરિધાનો દન્તુરો દન્તુરારિહૃત્ ॥ ૧૫૪॥

દન્તુરઘ્નો દણ્ડધારી દણ્ડનીતિપ્રકાશકઃ ।
દાંપત્યાર્થપ્રદો દંપત્યર્ચ્યો દંપત્યભીષ્ટદઃ ॥ ૧૫૫॥

દંપતિદ્વેષશમનો દંપતિપ્રીતિવર્ધનઃ ।
દન્તોલૂખલકો દંષ્ટ્રી દન્ત્યાસ્યો દન્તિપૂર્વગઃ ॥ ૧૫૬॥

દંભોલિભૃદ્દંભહર્તા દંડ્યવિદ્ધંશવારણઃ ।
દન્દ્રમ્યમાણશરણો દન્ત્યશ્વરથપત્તિદઃ ॥ ૧૫૭॥

દન્દ્રમ્યમાણલોકાર્તિકરો દણ્ડ ત્રયાશ્રિતઃ ।
દણ્ડપાણ્યર્ચ્યપદ્દણ્ડિ વાસુદેવસ્તુતોઽવતુ ॥ ૧૫૮॥

ઇતિ શ્રીમદ્દકારાદિ દત્તનામ સહસ્રકમ્ ।
પઠતાં શ્ૃણ્વતાં વાપિ પરાનન્દપદપ્રદમ્ ॥ ૧૫૯॥

॥ ઇતિ શ્રી પરમ પૂજ્ય પરમહંસ પરિવ્રાજકાચાર્ય
શ્રી શ્રી શ્રી મદ્વાસુદેવાનન્દ સરસ્વતી યતિ વરેણ્ય
વિરચિત દકારાદિ દત્ત સહસ્રનામસ્તોત્રમ્ ॥

Encoded and proofread by Arun Shantharam shantharam.arun@ gmail.com

---

*Shri Dattasahasranamastotram dakArAdi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*